# Shri SubrahmaNyAShTakam or shrIsubrahmaNya karAvalambastotram

# શ્રીસુબ્રહ્મણ્યાષ્ટકમ્ અથવા શ્રીસુબ્રહ્મણ્ય કરાવલમ્બસ્તોત્રમ્

## Document Information

Text title : Shri SubrahmanyAshtakam 1 or Subrahmanyakaravalmbastotram

File name : subrahmaNyAShTakamkarAvalambastotra.itx

Category : aShTaka, subrahmanya

Location : doc_subrahmanya

Proofread by : PSA Easwaran, Rajnarayanan C K krajnara gmail.com

Description-comments : Brihatstotraratnakara 1927 Madras, page 88, SSM

Latest update : November 2, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 2, 2023

*sanskritdocuments.org*

Shri SubrahmaNyAShTakam or shrIsubrahmaNya karAvalambastotram

# શ્રીસુબ્રહ્મણ્યાષ્ટકમ્ અથવા શ્રીસુબ્રહ્મણ્ય કરાવલમ્બસ્તોત્રમ્

હે સ્વામિનાથ! કરુણાકર દીનબન્ધો
   શ્રીપાર્વતીશમુખપઙ્કજપદ્મબન્ધો ।
શ્રીશાદિદેવગણપૂજિતપાદપદ્મ
   વલ્લીશનાથ મમ દેહિ કરાવલમ્બમ્ ॥ ૧॥

દેવાધિદેવસુત દેવગણાધિનાથ
   દેવેન્દ્રવન્દ્યમૃદુપઙ્કજમઞ્જુપાદ ।
દેવર્ષિનારદમુનીન્દ્રસુગીતકીર્તે
   વલ્લીશનાથ મમ દેહિ કરાવલમ્બમ્ ॥ ૨॥

નિત્યાન્નદાનનિરતાખિલરોગહારિન્
   ભાગ્યપ્રદાનપરિપૂરિતભક્તકામ ।
શ◌ૃત્યાગમપ્રણવવાચ્યનિજસ્વરૂપ
   વલ્લીશનાથ મમ દેહિ કરાવલમ્બમ્ ॥ ૩॥

ક્રૌઞ્ચાસુરેન્દ્રપરિખણ્ડન શક્તિશૂલ-
   ચાપાદિશસ્ત્રપરિમણ્ડિતદિવ્યપાણે । var પાશાદિશસ્ત્ર
શ્રીકુણ્ડલીશધરતુણ્ડશિખીન્દ્રવાહ var ધૃતતુણ્ડ
   વલ્લીશનાથ મમ દેહિ કરાવલમ્બમ્ ॥ ૪॥

દેવાધિદેવરથમણ્ડલમધ્યવેદ્ય
   દેવેન્દ્રપીઠનકરં દૃઢચાપહસ્તમ્ ।
શૂરં નિહત્ય સુરકોટિભિરીડ્યમાન
   વલ્લીશનાથ મમ દેહિ કરાવલમ્બમ્ ॥ ૫॥

હારાદિરત્નમણિયુક્તકિરીટહાર
   કેયૂરકુણ્ડલલસત્કવચાભિરામમ્ ।

હે વીર તારકજયામરવૃન્દવન્ઘ
   વલ્લીશનાથ મમ દેહિ કરાવલમ્બમ્ ॥ ૬॥

પઞ્ચાક્ષરાદિમનુમન્ત્રિતગાઙ્ગતોયૈઃ
   પઞ્ચામૃતૈઃ પ્રમુદિતેન્દ્રમુખૈર્મુનીન્દ્રૈઃ ।
પટ્ટાભિષિક્તહરિયુક્ત પરાસનાથ
   વલ્લીશનાથ મમ દેહિ કરાવલમ્બમ્ ॥ ૭॥

શ્રીકાર્તિકેય કરુણામૃતપૂર્ણદૃષ્ટ્યા
   કામાદિરોગકલુષીકૃતદુષ્ટચિત્તમ્ ।
સિક્ત્વા તુ મામવ કલાધરકાન્તિકાન્ત્યા
   વલ્લીશનાથ મમ દેહિ કરાવલમ્બમ્ ॥ ૮॥

સુબ્રહ્મણ્યાષ્ટકં પુણ્યં યે પઠન્તિ દ્વિજોત્તમાઃ ।
તે સર્વે મુક્તિમાયાન્તિ સુબ્રહ્મણ્યપ્રસાદતઃ ॥

સુબ્રહ્મણ્યાષ્ટકમિદં પ્રાતરુત્થાય યઃ પઠેત્ ।
કોટિજન્મકૃતં પાપં તત્ક્ષણાદેવ નશ્યતિ ॥

॥ ઇતિ શ્રીસુબ્રહ્મણ્યાષ્ટકં અથવા
શ્રીસુબ્રહ્મણ્ય કરાવલમ્બસ્તોત્રં સમ્પૂર્ણમ્ ॥

vallIsha is same as vallIsa as found in some prints.
granthanidhi
Proofread by PSA Easwaran, Rajnarayanan C K

*Shri SubrahmaNyAShTakam or shrIsubrahmaNya karAvalambastotram*
pdf was typeset on January 2, 2023

Please send corrections to *sanskrit@cheerful.com*